
॥श्रीकृष्णाय नमः॥ ॥अस्मत्कुलपतिः श्रीगोवर्धनधरप्रभुरस्मानपातु सदा विजयते॥
॥श्रीमदाचार्यचरणकमलेभ्यो नमः॥ ॥श्रीमद्वल्लभाचार्यमहाप्रभूणां चरणारविंदयोः शरणं प्रपद्ये॥

# Shri Vallabhacharya Charitram

**Authored by Muralidhara Dasa**



**First Edition**

**as Compiled, Typeset, Annotated, and Edited by**

**Umang Goswami**

**(Goswami Umang Vrajeshwaracharya)**
**the 17th Generational Descendent of the Vallabhāchārya Mahāprabhu and Acharya of Vāllabha Sampradāya (Pushtimarg)**

**Published online at academia.edu by Umang Goswami on**

**Kartik Krishna Ekadashi Vikram Samvat 2081 Vallabhabd 547**

**accordingly, October 27th, 2024 CE**

॥श्रीकृष्णाय नमः॥ ॥अस्मत्कुलपतिः श्रीगोवर्धनधरप्रभुरस्मानपातु सदा विजयते॥
॥श्रीमदाचार्यचरणकमलेभ्यो नमः॥ ॥श्रीमद्वल्लभाचार्यमहाप्रभूणां चरणारविंदयोः शरणं प्रपद्ये॥

# Shri Vallabhacharya Charitram

**authored by Muralidhara Dasa and as compiled, typeset, annotated, and edited by Umang Goswami**

नत्वा श्रीविठ्ठलगुरुं गोपीनाथांश सम्भवम्। तत्पितुश्चरितं दिव्यं वर्णयानि यथाश्रुतम्॥

अथ भगवान् पुण्डरीकदललोचनः पद्मासहायो व्रजसीमन्तिनीकुचकुङ्कुमाङ्कितवक्षस्थलो वनमाला विराजतो नवंजलदश्यामो नन्दराजस्व नित्यलीला दर्शनार्ह पुष्टिमार्गीय जीवान् स्वसेवामार्ग प्रवेशनेन प्रेमभक्तिरसनिमग्नचित्तान् पुनर्मुरलिका श्रवणेन स्वसमीपमानेतुं कलावप्युद्युक्तो मदनगोपाल रूपत्व पूजापरायणस्य स्वेनैव भक्तिमार्गे भाविकार्यार्थं प्रवेशितस्य पूर्वतपोयुक्तस्यान्ध्रदेशीयस्य ब्राह्मणस्य लक्ष्मणभट्टस्य गृहे स्वयमेव श्रीवल्लभाचार्यात्मनावततार॥[1]

… … …

अन्य दिवसे प्रातर्नित्यकर्मानुष्ठानानन्तरं शिष्येण सह विशाख-नगर राजसभां प्रविवेश। सनत्कुमार-शुकादि वत् स्वतेजसा राजसभां भासयामास। असूयादग्ध मातुलोऽपि सभासीन जनैस्तर्वैः भूपालेन चाप्यवशो भूत्वा प्रत्युत्थाय सम्मानयामास। राज्ञा भृशं मानितो भूत्वा रत्नासने उपविवेश। तत् पूर्वं तत्र विद्वज्जनैः कृत चर्चायां अवैष्णव जयमश्रृणोत्।

स्वयं तदसहमानः राज्ञा च प्रार्थितः साक्षाद्बलदेव इव भागवत-शास्त्रार्थ-चर्चयां रिपु-समूहं जित्वा कृष्णरायनामकेन तेन भूपालेन कनकाभिषेकं प्राप्यापि स्वमत स्थापनमात्रैक-प्रयोजनत्वात् भगवदितरनिस्टहत्वं विशदयन् तीर्थ यात्रार्थं प्रस्थितः राज्ञो मुदे चतुःपञ्चनिष्क-मात्रं स्वीकृतवान्।

कृष्णसेवा-मार्ग वर्धकं वेदव्यासमेव स्वशिष्यकोटिषु प्रख्यापयन् मायावादि प्रभृति नाना पाषण्ड मत शुष्क तृणेषु अग्निरिव चरन् नित्यदा नियमेन निकटवर्तिना परमाप्ततमेन दामोदरदासेन च अनुगतः गर्भ एव गोवर्धननाथेन स्वीयत्वेन अनुगृहीतवाम्।[2]

… … …

श्रीविट्ठलनाथः स्वपुत्राणां सप्तानां श्रीगिरिधर-गोविन्दराय-रघुपति-यदुपति प्रभृतीनां श्रीनाथेन सह नवनीतप्रियाद्यष्ट स्वरूपमपि दत्तवान्। सूरदास-प्रभृतयस्सर्वेऽपि विट्ठलनाथशिष्या एव व्रजवासिनां स्वसंप्रदाय-भक्तानां दृष्ट्या व्रजनाथस्य विट्ठलनाथस्यै(स्ये) पद्भेदस्याभावान् नित्यदा नारदस्तुतो मुरलीधर एव नारदेन सह स्वलीलातत्वं ममावबोधयन् विट्ठलनाथात्मना विराजत इति सर्वं समञ्जसम्॥

पुष्टिमार्गीय भक्तानां दासदासोऽस्मि नित्यदा। विट्ठलेश प्रसादेन सेवामार्ग रतस्तथा॥
गोपीजनमनः कान्तो नित्यदा भासतां हृदि। प्रेमानन्दरसादीनामास्पदं नन्दनन्दनः॥

श्रीकृष्णश्शरणं मम॥

जयतां विठ्ठलाधीशो वल्लभाचार्य नन्दनः। पद्मपत्रेक्षणः श्रीमान् कस्तूरीतिलकाङ्कितः॥
मङ्गलं विठ्ठलेशाय पुण्डरीकप्रियाय च। वनमालाधरायास्तु विष्णवे सर्वजिष्णवे॥

श्रीहरिर्जयति॥[3]

[1] See (Sastri, 1898, pp. 158-159). This beginning excerpt was published by Government of Madras Presidency.

[2] This middle portion has been quoted in the (Ayyangar, 1919, pp. 154-155) as a source of the history of Vijayanagar empire.

[3] See (Sastri, 1898, pp. 158-159). This ending excerpt was published by the Government of Madras Presidency.

# BIBLIOGRAPHY

Ayyangar, S. K. (Ed.). (1919). *Sources of Vijayanagar History.* Gian Publishing House, Delhi. Retrieved October 27, 2024, from https://archive.org/details/in.ernet.dli.2015.189280/

Sastri, M. S. (1898). *Report on a search for Sanskrit and Tamil Manuscrips for the year 1896-97* (Vol. 1). Madras: The Superintendent Government Press, Madras. Retrieved from https://www.tamildigitallibrary.in/book-detail?id=jZY9lup2kZl6TuXGlZQdjZp8jZQ0